वागर्थाविव	=	वागर्थौ + इव
उडुपेनास्मि	=	उडुपेन + अस्मि
वंशेऽस्मिन्	=	वंशे + अस्मिन्

सोऽहम्	=	सः + अहम्
यथापराध	=	यथा + अपराध
तद्गुणैः	=	तत् + गुणैः
सदसत्	=	सत् + असत्

अभ्यासः

1. **संस्कृतेन उत्तरं देयम्**
   - (क) अयं पाठः कस्माद् ग्रन्थात् उद्धृतः?
   - (ख) रघुवंशमहाकाव्यस्य रचयिता कः अस्ति?
   - (ग) कालिदासः कीदृशं सागरं (तितीर्षुः अस्ति)? तरीतुम् इच्छति?
   - (घ) वज्रसमुत्कीर्णे मणौ सूत्रस्य इव गतिः कस्य अस्ति?
   - (ङ) राज्ञः दिलीपस्य रथः कुत्र गच्छति स्म?
   - (च) राजा दिलीपः शैशवे कस्य अभ्यासं करोति?
   - (छ) दिलीपः गां किमर्थं दुदोह?
   - (ज) हेम्नः श्यामिका कुत्र दृश्यते?
   - (झ) अन्ते योगेन किं त्यजन्ति?

2. **रिक्तस्थानपूर्तिः क्रियताम्**
   - (क) जगतः पितरौ ________ परमेश्वरौ।
   - (ख) मणौ ________ मे गतिः।
   - (ग) शैशवे ________ तनुत्यजाम्।
   - (घ) त्यागाय ________ मितभाषिणाम्।
   - (ङ) दुदोह गां ________ भुवनद्वयम्।

3. **सप्रसङ्ग व्याख्यायेताम्**
   - (क) तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्।
   - (ख) तद्गुणैः कर्णमागत्य चापलाय प्रचोदितः।

4. द्वितीय-दशमश्लोकयोः स्वमातृभाषया अनुवादः क्रियताम्।

5. अधोलिखितपदानाम् उचितम् अर्थं कोष्ठकात् चित्वा लिखत।

(सन्तान के लिए), (पृथिवी को), (माता-पिता को), (कहूँगा), (सुनने के लिए), (समुद्र को), (विधिपूर्वक), (इन्द्र), (पूर्व विद्वानों के द्वारा)

(क) पितरौ – ______________

(ख) सागरम् – ______________

(ग) पूर्वसूरिभिः – ______________

(घ) यथाविधि – ______________

(ङ) प्रजायै – ______________

(च) वक्ष्ये – ______________

(छ) गाम् – ______________

(ज) मघवा – ______________

(झ) श्रोतुम् – ______________

6. विपरीतार्थमेलनं क्रियताम्

मोहात्	नरकम्
मे	असत्याय
सत्याय	ते
दिवम्	अज्ञानात्

7. सन्धिविच्छेदः क्रियताम्

यथा– चाल्पविषया = च + अल्पविषया

उडुपेनास्मि =

इवास्ति =

श्यामिकाऽपि =

अत्रागच्छ =

पञ्चमः पाठः

सिंह-शृगालपुत्रयोः कथा

पञ्चतन्त्र संस्कृत साहित्य का अद्भुत ग्रन्थ है। इसमें पं. विष्णुशर्मा ने मित्रलाभ, सुहृद्भेद, लब्धप्रणाश, अपरीक्षितकारक और काकोलूकीय इन पाँच तन्त्रों (भागों) के अन्तर्गत छोटी-छोटी कथाओं के द्वारा नीतिगत बातें बतायी हैं। एक राजा के कुमार्गगामी राजकुमारों को सन्मार्ग पर लाने के लिए पञ्चतन्त्र की रचना की गई थी। प्रस्तुत पाठ में एक शेर अपने दो बच्चों और शेरनी के आहारार्थ शिकार के लिए जंगल में जाता है। पूरे दिन के प्रयास के पश्चात् सायंकाल एक जीवित शृगालशिशु को लाकर शेरनी को देता है। वह उसे स्वजातीय और शिशु समझकर अपने तृतीय पुत्र के रूप में स्वीकारती है। एक दिन एक हाथी वहाँ आ गया। वे दोनों सिंहशावक हाथी को देखकर क्रोधित हुए किन्तु शृगालशिशु दोनों भाइयों को हतोत्साहित करता हुआ वापस आया और सिंहनी से दोनों सिंह शावकों की शिकायत करने लगा। इस पर वह सिंहनी उस शृगालपुत्र से कहती है– हे पुत्र! तू शूर है, बुद्धिमान् है और दर्शनीय भी है, किन्तु जिस (शृगाल) कुल में तू पैदा हुआ है, उसमें हाथी नहीं मारे जाते।

कस्मिंश्चिदुद्देशे सिंहदम्पती प्रतिवसतः स्म। अथ सिंही पुत्रद्वयमजीजनत्। सिंहोऽपि नित्यमेव मृगान् व्यापाद्य सिंह्यै ददाति। अथान्यस्मिन्नहनि तेन किमपि नासादितम्। वने भ्रमतोऽपि तस्य रविरस्तं गतः। अथ तेन स्वगृहमागच्छता शृगालशिशुः प्राप्तः। स च बालकोऽयमित्यवधार्य, यत्नेन

दंष्ट्रामध्यगतं कृत्वा सिंह्यै जीवन्तमेव समर्पितवान्। ततः सिंह्याभिहितं – "भो कान्त! त्वयानीतं किञ्चिदस्माकं भोजनम्?" सिंह आह – "प्रिये! मयाद्यैनं शृगालशिशुं परित्यज्य न किञ्चित्सत्त्वमासदितम्। स च मया बालोऽयमिति मत्वा न व्यापादितो विशेषात् स्वजातीयश्च। उक्तञ्च–

स्त्रीविप्रलिङ्गिबालेषु प्रहर्त्तव्यं न कर्हिचित्।
प्राणात्ययेऽपि सञ्जाते विश्वस्तेषु विशेषतः।।

इदानीं त्वमेनं भक्षयित्वा पथ्यं कुरु। प्रभातेऽन्यत्किञ्चिदुपार्जयिष्यामि।" सा प्राह – "भो कान्त! त्वया बालकोऽयमिति विचिन्त्य न हतः, तत्कथमेनमहं स्वोदरार्थे विनाशयामि? तस्मान्ममायं तृतीयः पुत्रो भविष्यति।" इत्येवमुक्त्वा सा तमपि स्वस्तनक्षीरेण परां पुष्टिमनयत्। एवं ते त्रयोऽपि शिशवः परस्पराज्ञातजातिविशेषा एकाहारविहारा बाल्यसमयं निर्वाहयन्ति स्म।

अथ कदाचित्तत्र वने भ्रमन्नरण्यगजः समायातः। तं दृष्टवा तौ सिंहसुतौ द्वावपि कुपिताननौ तं प्रति प्रचलितौ यावत्, तावत्तेन शृगालसुतेनाभिहितम् – "अहो, गजोऽयं युष्मत्कुलशत्रुः। तन्न गन्तव्यमेतस्याभिमुखम्" एवमुक्त्वा गृहं प्रति प्रधावितः। तावपि ज्येष्ठबान्धवभङ्गान्निरुत्साहतां गतौ।

अथवा, साध्विदमुच्यते–

एकेनापि सुधीरेण सोत्साहेन रणं प्रति।
सोत्साहं जायते सैन्यं भग्ने भङ्गमवाप्नुयात्।।

तथा च –

अत एव हि वाञ्छन्ति भूपा योधान् महाबलान्।
शूरान् वीरान् कृतोत्साहान् वर्जयन्ति च कातरान्।।

अथ तौ द्वावपि भ्रातरौ गृहं प्राप्य पित्रोरग्रतो विहसन्तौ ज्येष्ठभ्रातृचेष्टितमूचतुः। यथाऽयं गजं दृष्ट्वा दूरतोऽपि प्रणष्टः। सोऽपि तदाकर्ण्य कोपाविष्टमना प्रस्फुरिताधरपल्लव ताम्र-लोचन स्त्रिशिखां भृकुटिं कृत्वा तौ निर्भर्त्सयन् परुषतरवचनान्युवाच। ततः सिंह्या एकान्ते नीत्वा प्रबोधितोऽसौ – "वत्स! मैवं कदाचिज्जल्प। भवदीयलघुभ्रातरौ एतौ" इति।

अथासौ सान्त्ववचनेन प्रभूततरकोपाविष्टस्तामप्युवाच – "किमहमेताभ्यां शौर्येण, रूपेण, विद्याभ्यासेन, कौशलेन वा हीनो, येन मामुपहसतः? तन्मयावश्यमेतौ व्यापादनीयौ।" तदाकर्ण्य सिंही तस्य जीवितमिच्छन्त्यन्तर्विहस्य प्राह–

शूरोऽसि कृतविद्योऽसि दर्शनीयोऽसि पुत्रक!
यस्मिन् कुले त्वमुत्पन्नो गजस्तत्र न हन्यते।।

शब्दार्थाः टिप्पण्यश्च

सिंहदम्पती	:	शेर और शेरनी।
अजीजनत्	:	पैदा किया।
व्यापाद्य	:	मारकर।
अहनि	:	दिन में।
न आसादितम्	:	नहीं मिला।
शृगालशिशुः	:	शृगाल का बच्चा।
दंष्ट्रामध्यगतं	:	दंष्ट्रायाः मध्यगतं दंष्ट्रामध्यगतम्, दाढों के बीच में।
जीवन्तम् एव	:	जीव + शतृ+ (अत्) तम् जीवन्तम्, जीवित ही।

समर्पितवान्	:	दिया।
अभिहितम्	:	कहा।
परित्यज्य	:	परि + त्यज् + क्त्वा (ल्यप्) (य), त्यागकर।
मत्वा	:	मानकर।
न व्यापादितः	:	नहीं मारा (गया)।
प्राणात्ययेऽपि	:	प्राणानाम् अत्ययः प्राणात्ययः तस्मिन्, प्राण संकट में भी।
भक्षयित्वा	:	खाकर।
प्रभाते	:	प्रातःकाल।
उपार्जयिष्यामि	:	उपार्जन करूँगा।
स्वोदरार्थे	:	उदरस्य अर्थम् उदरार्थम् तस्मिन्, उदरपूर्ति निमित्त।
स्वस्तनक्षीरेण	:	अपने स्तन के दूध से।
निर्वाहयन्ति स्म	:	व्यतीत करते थे।
अरण्यगजः	:	अरण्यस्य गजः अरण्यगजः, जंगली हाथी।
कुपिताननौ	:	कुपितम् आननं ययोस्तौ कुपिताननौ, क्रोधित मुख वाले।
अभिमुखम्	:	सम्मुख।
निरुत्साहतां	:	हतोत्साहित।
सैन्य	:	सेना।
भूपाः	:	राजा।
पित्रोः	:	माता च पिता च पितरौ तयोः पित्रोः (एकशेष), माता-पिता के।
पल्लवताम्रलोचनः	:	पल्लव इव ताम्रे लोचने यस्य सः, नए पत्ते के समान लाल-लाल आँखों वाला।
मा जल्प	:	न कहो।
न हन्यते	:	नहीं मारा जाता।

अभ्यासः

1. संस्कृतेन उत्तरं देयम्

(क) अयं पाठः कस्माद् ग्रन्थात् सङ्कलितः ?

(ख) सिंहः मृगान् व्यापाद्य कस्यै ददाति स्म ?

(ग) शृगालशिशुः केन प्राप्तः?

(घ) सिंहेन शृगालशिशुः किमर्थं न व्यापादितः ?

(ङ) सिंह्याः तृतीयः पुत्रः कः अभवत् ?

(च) सिंहसुतौ कं दृष्ट्वा कुपिताननौ अभवताम् ?

(छ) गजः कस्य कुलशत्रुः अस्ति ?

2. रिक्तस्थानपूर्तिः क्रियताम्

(क) तेन ________ नासादितम्।

(ख) त्वया ________ भोजनम्।

(ग) स्त्रीविप्र ________ विशेषतः।

(घ) अथ कदाचित् ________ समायातः।

(ङ) यथायं ________ प्रणष्टः।

(च) शूरोऽसि ________ न हन्यते।

3. अधोलिखितयोः गद्यांशयोः भावार्थं लिखत

(क) स च मया बालोऽयमिति मत्वा न व्यापादितो विशेषात् स्वजातीयश्च।

(ख) तस्मान्ममायं तृतीयः पुत्रो भविष्यति।

4. 'क' भागस्य पदैः सह 'ख' भागस्यार्थानां मेलनं क्रियताम्

'क'	'ख'
सिंहः	शावकः
शृगालशिशुः	विहाय
परित्यज्य	श्रुत्वा
बालः	मृगेन्द्रः

पुत्रः	जम्बुकशिशुः
गजोऽयम्	तनयः
आकर्ण्य	नगोऽयम्

5. उदाहरणानुसारं विग्रहपदानि आधृत्य समस्तपदानि रचयत

यथा – विग्रहपदानि समस्तपदानि

सिंहस्य दम्पती = सिंहदम्पती

स्वस्य गृहम् = ____________

प्राणानाम् अत्ययः = ____________

सिंहस्य सुतौ = ____________

पल्लवताम्रे लोचने यस्य = ____________

षष्ठः पाठः

प्राचीनं जलविज्ञानम्

आकाश से गिरने वाला जल, वायु और भूमि के संसर्ग से विभिन्न रंग और स्वाद का हो जाता है। यही जल पृथ्वी के नीचे कितना खोदने पर खारा या मीठा, मृदु या रूक्ष मिलेगा – इसकी गणना संस्कृत के प्राचीन वैज्ञानिकों ने की है। आचार्य वराहमिहिर ने अपनी "बृहत्संहिता" के "दकार्गल" अध्याय में इसका विवेचन करते हुए बताया है कि जल की शिराएँ भिन्न-भिन्न स्थितियों में ऊपर-नीचे के तलों पर विद्यमान रहती हैं जहाँ अपार जलराशि न्यूनाधिक रूप में उपलब्ध होती है। मरुप्रदेश में जलभंडार की प्राप्ति के क्या-क्या लक्षण हैं – इसका भी वर्णन उक्त अध्याय में किया गया है। यह पाठ वहीं से उद्धृत है।

धर्म्यं यशस्यं च वदाम्यतोऽहं दकार्गलं येन जलोपलब्धिः।
पुंसां यथाङ्गेषु शिरास्तथैव क्षितावपि प्रोन्नतनिम्नसंस्थाः।।1।।

एकेन वर्णेन रसेन चाम्भश्च्युतं नभस्तो वसुधाविशेषात्।
नानारसत्वं बहुवर्णतां च गतं परीक्ष्यं क्षितितुल्यमेव।।2।।

यदि वेतसोऽम्बुरहिते देशे हस्तैस्त्रिभिस्ततः पश्चात्।
सार्धे पुरुषे तोयं वहति शिरा पश्चिमा तत्र।।3।।

चिह्नमपि चार्धपुरुषे मण्डूकः पाण्डुरोऽथ मृत्पीता।
पुटभेदकश्च तस्मिन् पाषाणो भवति तोयमधः।।4।।

जम्बूवृक्षस्य प्राग् वल्मीको यदि भवेत् समीपस्थः।
तस्माद् दक्षिणपार्श्वे सलिलं पुरुषद्वये स्वादु।।5।।

अर्धपुरुषे च मत्स्यः पारावतसन्निभश्च पाषाणः।
मृद् भवति चात्र नीला दीर्घकालं च बहु तोयम्।।6।।

मरुदेशे भवति शिरा यथा तथातः परं प्रवक्ष्यामि।
ग्रीवा करभाणामिव भूतलसंस्थाः शिराः यान्ति।।7।।

उत्तरतश्च मधूकादहिनिलयः पश्चिमे तरोस्तोयम्।
परिहृत्य पञ्चहस्तानर्धाष्टमपौरुषान् प्रथमम्।।8।।

उत्तरतश्च करीरस्याहिगृहं दक्षिणे जलं स्वादु।
दशभिः पुरुषैः ज्ञेयं पुरुषे पीतोऽत्र मण्डूकः।।9।।

यदि वा सुवर्णनाम्नः तरोर्भवेद् वामतो भुजङ्गगृहम्।
हस्तद्वये तु याम्ये पञ्चदशनरावसानेऽम्बु।।10।।

क्षारं पयोऽत्र नकुलोऽर्धमानवे ताम्रसन्निभश्चाश्मा।
रक्ता च भवति वसुधा वहति शिरा दक्षिणा तत्र।।11।।

शब्दार्थाः टिप्पण्यश्च

यशस्यम्	:	यश देने वाला।
दकार्गलम्	:	जलनिबन्धन (जल को सुरक्षित रखने का स्थान)।
क्षितौ	:	पृथिवी पर।
प्रोन्नतनिम्नसंस्थाः	:	ऊँचे नीचे रूप में स्थित।
रसेन	:	स्वाद से।
अम्भः	:	जल।
नभस्तः	:	आकाश से।
च्युतम्	:	पतित (गिरा हुआ)।

परीक्ष्यम्	:	जाँच करने योग्य।
बहुवर्णताम्	:	बहुत प्रकार के रंगों के रूप में।
वेतसः	:	वेंत के वृक्ष से।
अम्बुरहिते	:	पानी से रहित।
सार्धे पुरुषे	:	डेढ़ पुरुष के शरीर की लम्बाई के बराबर (साढ़े सात हाथ पर) (7½ Cubits)।
शिरा	:	शिरा (नस) जलवाहिनी।
पाण्डुरः	:	श्वेतपीत (सफेदी लिये हुए हल्का पीला)।
मृत्पीता	:	पीली मिट्टी।
पुटभेदकः पाषाणः	:	कठोर पत्थर।
जम्बूवृक्षस्य प्राक्	:	जामुन के वृक्ष से पूर्व।
वल्मीकः	:	बमई (चींटियों द्वारा निकाली गई भुरभुरी मिट्टी का ढेर)।
पुरुषद्वये	:	दो पुरुषों की लम्बाई के बराबर (10 हाथ या 10 Cubits)
स्वादु	:	स्वादिष्ट।
दक्षिणपार्श्वे	:	दक्षिण की ओर।
मत्स्यः	:	मछली।
पारावतसन्निभः	:	कबूतर के समान।
मरुदेशे	:	मरुस्थल में।
ग्रीवा	:	गर्दन।
करभाणाम्	:	ऊँटों की।
भूतलसंस्थाः	:	पृथ्वी की सतह पर स्थित।
मधूकात्	:	महुए के पेड़ से।
उत्तरतः	:	उत्तर की ओर।
अहिनिलयः	:	साँप का घर (बमई)।
पञ्चहस्तान्	:	पाँच हाथ।
परिहृत्य	:	छोड़कर।
करीरस्य	:	करील वृक्ष के।

अहिगृहम्	साँप का घर (बमई)।
दशभिः पुरुषैः	दस पुरुषों के बराबर लम्बाई (50 हाथ – 50 Cubits)।
सुवर्णनाम्नः तरोः वामतः	अमलतास के वृक्ष के बाईं ओर।
हस्तद्वये	दो हाथ की दूरी पर।
याम्ये	बाईं ओर।
पञ्चदशनरावसाने	पन्द्रह पुरुषों की लम्बाई के बराबर की गहराई पर (पचहत्तर हाथ की गहराई पर)।
अर्धमानवे	आधे मनुष्य की लम्बाई के बराबर (ढाई हाथ)।
नकुलः	नेवला।
ताम्रसन्निभः	ताम्बे के रंग के समान।
अश्मा	पत्थर।
भुजङ्गगृहम्	साँप का घर (बमई)।

अभ्यासः

1. **संस्कृतभाषया उत्तराणि लिखत**

   (क) 'दकार्गलम्' शब्दस्य कः अर्थः ?

   (ख) स्वादु जलं कुत्र (कीदृश्यां भूमौ) लभ्यते ?

   (ग) कीदृशी सा भूमिः यत्र बहुकालस्थितम् अत्यधिकं च जलं प्राप्यते?

   (घ) यत्र करीरवृक्षस्य उत्तरतः अहिगृहं स्यात् तत्र किं वैशिष्ट्यम्?

   (ङ) क्षारं जलं कीदृशे स्थाने प्राप्यते।

2. **अयं पाठः कस्मात् ग्रन्थात् गृहीतः ? किं च तद्ग्रन्थस्य वैशिष्ट्यम्?**

3. **अस्य पाठस्य सारांशः संक्षेपेण लेखनीयः?**

4. **अस्मिन् पाठे जलविज्ञानविषये कानि रहस्यानि वर्णितानि ?**

5. **निम्नलिखितानां शब्दानाम् आशयः प्रकाशनीयः**

वल्मीकः, अर्धपुरुषः, पारावतसन्निभः, ग्रीवा, करभाणामिव, अर्धाष्टमपौरुषान्, भुजङ्गगृहम्, ताम्रसन्निभः, अश्मा, पुटभेदकः पाषाणः, पञ्चदशनरावसाने।

6. **निम्नाङ्कितानां पदानाम् अर्थमेलनं कुरुत**

क्षितौ	पाषाणः
च्युतम्	आकाशात्
नभस्तः	पृथिव्याम्
पुटभेदकः	स्वादिष्टः
स्वादु	कठोरः
अश्मा	पतितम्

7. **अधोलिखितयोः श्लोकयोः भावार्थौ लेख्यः**

यदि वेतसोऽम्बुरहिते देशे हस्तैस्त्रिभिस्ततःपश्चात्।
सार्धे पुरुषे तोयं वहति शिरा पश्चिमा तत्र।।
चिह्नमपि चार्धपुरुषे मण्डूकः पाण्डुरोऽथ मृत्पीता।
पुटभेदकश्च तस्मिन् पाषाणो भवति तोयमधः।।

विशेष

(1) **दकार्गलम्**– 'दक' शब्द 'उदक' का लघु रूप है, जिसका अर्थ है 'जल'। 'अर्गला' शब्द का अर्थ है 'सांकल' (किवाड़ बन्द करने का उपकरण)। इस प्रकार 'दकार्गल' का अर्थ हुआ जल को सुरक्षित रोके रखने व नियंत्रित (निबन्धित) करने का विज्ञान।

(2) **पुरुष** – इस पाठ में 'पुरुष' शब्द पारिभाषिक है। यहाँ 'पुरुष' शब्द का अर्थ है – पुरुष के शरीर के बराबर परिमाण। 'पुरुष परिमाण' से अभिप्राय है – हाथ ऊँचा करके खड़े हुए पुरुष के बराबर लम्बाई, जिसको पाँच हाथ (5 Cubits) के बराबर माना गया है।

सप्तमः पाठः

सुभाषितसञ्जीविनी

प्रस्तुत पाठ महाकवि भर्तृहरि कृत "नीतिशतकम्" नामक पुस्तक से संकलित है, जिसमें सत्संगति का महत्त्व, महापुरुषों की मनोवृत्ति, धन की गति, दुर्जन और सज्जन की मित्रता में अन्तर, महापुरुषों के भूषण, पुत्र, पत्नी और मित्र के लक्षण, सज्जनों के द्वारा ग्राह्य पदार्थ, जीवन के कर्त्तव्याकर्त्तव्यों का विवेचन, अनुशासित एवं कृतज्ञतापूर्ण जीवनयापन का कठिन व्रत, आलस्य का त्याग एवं उद्यम का अवलम्बन करने सम्बन्धी नीतिपरक सूक्तियों का संकलन है।

जाड्यं धियो हरति सिञ्चति वाचि सत्यम्
मानोन्नतिं दिशति पापमपाकरोति।
चेतः प्रसादयति दिक्षु तनोति कीर्तिम्
सत्सङ्गतिः कथय किं न करोति पुंसाम्।।1।।

कुसुमस्तबकस्येव द्वयी वृत्तिर्मनस्विनः।
मूर्ध्नि वा सर्वलोकस्य विशीर्येत वनेऽथवा।।2।।

दानं भोगो नाशस्तिस्रो गतयो भवन्ति वित्तस्य।
यो न ददाति न भुङ्क्ते तस्य तृतीया गतिर्भवति।।3।।

आरम्भगुर्वी क्षयिणी क्रमेण
लघ्वी पुरा वृद्धिमती च पश्चात्।
दिनस्य पूर्वार्धपरार्धभिन्ना
छायेव मैत्री खलसज्जनानाम्।।4।।

करे श्लाघ्यस्त्यागः शिरसि गुरुपादप्रणयिता
मुखे सत्या वाणी विजयि भुजयोर्वीर्यमतुलम्।
हृदि स्वच्छा वृत्तिः श्रुतिमधिगतं च श्रवणयो-
र्विनाऽप्यैश्वर्येण प्रकृतिमहतां मण्डनमिदम्।।5।।

यः प्रीणयेत्सुचरितैः पितरं स पुत्रो
यद्भर्तुरेव हितमिच्छति तत्कलत्रम्।
तन्मित्रमापदि सुखे च समक्रियं य-
देतत्त्रयं जगति पुण्यकृतो लभन्ते।।6।।

तृष्णां छिन्धि भज क्षमां जहि मदं पापे रतिं मा कृथाः
सत्यं ब्रूह्यनुयाहि साधु पदवीं सेवस्व विद्वज्जनम्।
मान्यान्मानय विद्विषोऽप्यनुनय प्रख्यापय प्रश्रयम्
कीर्तिं पालय दुःखिते कुरु दयामेतत्सतां लक्षणम्।।7।।

प्रदानं प्रच्छन्नं गृहमुपगते सम्भ्रमविधिः
प्रियं कृत्वा मौनं सदसि कथनं चाप्युपकृतेः।
अनुत्सेको लक्ष्म्यामनभिभवगन्धाः परकथाः
सतां केनोद्दिष्टं विषममसिधाराव्रतमिदम्।।8।।

आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।
नास्त्युद्यमसमो बन्धुः कुर्वाणो नावसीदति।।9।।

शब्दार्थाः टिप्पण्यश्च

धियः	:	बुद्धि को।
जाड्यम्	:	जड़ता (मन्द गति) को।
वाचि	:	वाणी में।
दिशति	:	(मार्ग) दिशा प्रशस्त करती है।

अपाकरोति	:	दूर करती है।
चेतः	:	चित्त को, मन, बुद्धि, चित्त, अहंकार – ये अन्तःकरण के चार विभाग हैं जिनमें चित्त भावों को सुरक्षित रखता है।
दिक्षु	:	दिशाओं में।
तनोति	:	विस्तार करता है।
कीर्तिम्	:	कीर्ति को, यश को।
पुंसाम्	:	व्यक्तियों का।
कुसुमस्तवकस्येव	:	कुसुमस्य स्तवकस्य इव, पुष्पों के गुच्छों के समान।
वृत्तिः	:	व्यवहार, आचरण।
मनस्विनः	:	स्वाभिमानियों की।
मूर्ध्नि	:	शीर्ष स्थान पर।
सर्वलोकस्य	:	सभी प्राणियों के।
विशीर्येत	:	बिखर जाता है।
भोगः	:	उपभोग करना।
नाशः	:	विनाश होना, नष्ट होना, अन्त होना।
गतयः	:	परिणति, परिणाम।
वित्तस्य	:	धन की।
भुङ्क्ते	:	उपयोग करता है।
गुर्वी	:	घनी, सघन, गहरी।
क्षयिणी	:	घटने वाली।
क्रमेण	:	क्रम से।
लघ्वी	:	छोटी, कम मात्रा में।
वृद्धिमती	:	वर्धनशील, बढ़नेवाली।
पश्चात्	:	बाद में।
पूर्वार्ध	:	दोपहर के पूर्व का समय।
परार्ध	:	दोपहर के बाद का समय।

छायेव	:	छाया के समान, (प्रातःकाल की छाया बड़ी होती जाती है और मध्याह्न तक छोटी हो जाती है। मध्याह्न के बाद की छाया छोटी से क्रमशः बड़ी होती जाती है। उसी प्रकार सज्जनों और दुर्जनों की मित्रता का विकास एवं संकोच होता है)।
श्लाघ्यः	:	प्रशंसा, आत्मप्रशंसा का त्याग महापुरुषों का भूषण है।
गुरुपादप्रणयितां	:	गुरुपादयोः प्रणयिता अर्थात् प्रणाम, गुरु के चरणों में प्रणामशीलता।
श्रुतिमधिगतं	:	वेदों की ध्वनि से युक्त होना।
मण्डनम्	:	विभूषण, शोभा, अलंकार।
कलत्रम्	:	स्त्री, पत्नी, भार्या, अर्धांगिनी।
छिन्धि	:	विच्छिन्न कर दो, दूर करो।
जहि	:	त्याग दो, छोड़ दो।
कृथाः	:	करो।
प्रश्रयम्	:	आश्रय ग्रहण करने वाले को।
सम्भ्रमविधिः	:	हड़बड़ाहट, स्वागत करने की आतुरता।
अवसीदति	:	खिन्न होता है, अवसाद को प्राप्त होता है।

अभ्यासः

1. संस्कृतेन उत्तरं देयम्

   (क) नीतिशतकस्य रचयिता कः अस्ति ?

   (ख) वाचि सत्संगतिः किं करोति ?

   (ग) मनस्विनः वृत्तिः कस्य इव भवति ?

(घ) वित्तस्य तिस्रः गतयः काः भवन्ति ?

(ङ) छायेव मैत्री केषां भवति ?

(च) पुण्यकृतो जगति किं त्रयं लभन्ते ?

(छ) सतां त्रीणि लक्षणानि कानि ?

(ज) असिधाराव्रतं केषां भवति ?

(झ) मनुष्याणां महान् शत्रुः कः ?

2. रिक्तस्थानपूर्तिः क्रियताम्

(क) सत्संगतिः चेतः ______________ ।

(ख) कुसुमस्तबकः वने ______________ ।

(ग) वित्तस्य ______________ तिस्रः भवन्ति ।

(घ) महतां शिरसि ______________ ।

(ङ) यद् भर्तुः ______________ तत्कलत्रम् ।

(च) नास्ति ______________ बन्धुः ।

3. अधोलिखितयोः पद्यांशयोः भावार्थं लिखत

(क) द्वयी वृत्तिर्मनस्विनः

(ख) प्रकृतिमहतां मण्डनमिदम्

(ग) एतत् सतां लक्षणम्

(घ) तेषु एव लोकस्थितिः

4. 'क' भागस्थपदैः सह 'ख' भागस्यार्थानां मेलनं क्रियताम्

'क'	**'ख'**
मित्रम्	गुरुपादप्रणयिता
मुखे	मैत्री
श्रवणयोः	सत्या वाणी
भुजयोः	दयाम्
शिरसि	समक्रियम्
वृद्धिमती	वीर्यमतुलम्
दुःखिते	श्रुतिमधिगतम्
मौनं	आलस्यम्
शत्रुः	सदसि

5. उदाहरणानुसारं विग्रहपदानि आधृत्य समस्तपदानि रचयत

यथा– विग्रहपदानि		समस्तपदानि
मानस्य उन्नतिम्	=	मानोन्नतिम्
कुसुमानाम् स्तबकः	=	______
पूर्वं च तत् अर्धं	=	______
गुरुपादयोः प्रणयिता	=	______
शरीरे स्थितः	=	______

अष्टमः पाठः

व्यवसाये विक्रयसिद्धान्तविवेचनम्

प्रस्तुत पाठ कौटिल्य (चाणक्य) कृत 'अर्थशास्त्र' नामक ग्रन्थ के 'पण्याध्यक्ष' नामक सोलहवें अध्याय से संकलित किया गया है। कौटिल्य ने अपने अर्थशास्त्र में तत्कालीन संघराज्यों की शासन-व्यवस्था के लिए प्रचुर धन के रूप में राजकोष की वृद्धि के उपायों का वर्णन किया है। राजा को स्वदेश और परदेश की वस्तुओं की बिक्री का ऐसा प्रबन्ध करना चाहिये, जिससे प्रजा को किसी प्रकार का कष्ट न हो। गोदाम में सुरक्षित माल का सोलहवाँ भाग कर रूप में राजा को देना चाहिए। उसे व्याजी या मानव्याजी कहा जाता है। प्रस्तुत अंश में पण्याध्यक्ष के कार्य-अकार्य के विषय में वर्णन किया गया है। परदेश में निर्यात-व्यापार के सम्बन्ध में पण्याध्यक्ष को चाहिए कि वह इस पर विचार कर इस तरह व्यापार कार्य करे कि स्वदेश तथा विदेश में बेची जाने वाली किन चीजों के मूल्य में परस्पर न्यूनाधिक्य है, इसके अतिरिक्त बिक्रीकर, सीमान्त अधिकारी का कर, सुरक्षा के लिए पुलिस का मार्गकर, जंगल के रक्षक का कर, नदी पार कर तथा अपने भोजनादि के व्यय को निकाल कर शेष लाभ पर विचार करना चाहिए।

पण्याध्यक्षः स्थलजलजानां नानाविधानां पण्यानां स्थलपथ-वारिपथोपयातानां प्रियाप्रियतां च विद्यात्, तथा विक्षेपसंक्षेप-क्रयविक्रययोगकालान्। यच्च पण्यं प्रचुरं स्यात् तदेकीकृत्य

अर्घमारोपयेत्। प्राप्तेऽर्घे वा अर्घान्तरं कारयेत्। स्वभूमिजानां राजपण्यानाम् एकमुखं व्यवहारं स्थापयेत्।

परभूमिजानाम् अनेकमुखम्। उभयं च प्रजानाम् अनुग्रहेण विक्रापयेत्। बहुमुखं वा राजपण्यं वैदेहकाः कृतार्घं विक्रीणीरन्। छेदानुरूपं च वैधरणं दद्युः। पण्याधिष्ठातारः पण्यमूल्यम् एकमुखं काष्ठद्रोण्याम् एकच्छिद्रापिधानायां निदध्युः। अह्नः च अष्टमे भागे पण्याध्यक्षस्य अर्पयेयुः। "इदं विक्रीतम् इदं शेषमिति"। तुलामानभाण्डकं चार्पयेयुः। इति स्वविषये व्याख्यातम्।

परविषये तु पण्यप्रतिपण्योरर्घं मूल्यं च आगमय्य शुल्क वर्तन्यातिवाहिकगुल्मतरदेयभक्तभाटक-व्ययशुद्धमुदयं पश्येत्। असति उदये भाण्डनिर्वहणेन पण्य-प्रतिपण्यार्घेण वा लाभं पश्येत्।

आपदि सारमात्मानं वा मोक्षयेत्। आत्मनो वा भूमिमप्राप्तः सर्वदेयमशुद्धं व्यवहरेत्। वारिपथे वा यानभाटकपथ्यदनपण्य-प्रतिपण्यार्घप्रमाणयात्राकालभय-प्रतीकारपण्यपत्तनचारित्राणि उपलभेत।

नदीपथे च विज्ञाय व्यवहारं चरित्रतः।
यतो लाभस्ततो गच्छेदलाभं परिवर्जयेत्।।

शब्दार्थाः टिप्पण्यश्च

पण्याध्यक्षः : पण्यानाम् अध्यक्षः, वस्तुओं के क्रय-विक्रय के कार्य में नियुक्त (व्यक्ति)।

पण्यम् : क्रय-विक्रय के योग्य (वस्तु)।

पण्यानाम्	:	क्रय-विक्रय (वस्तुओं) का, लेन-देन के योग्य (वस्तुओं) का।
स्थलजलजानाम्	:	स्थल (मिट्टी) तथा जल से उत्पन्न (वस्तुओं) का।
स्थलपथवारिपथोपयातानाम्	:	स्थल और जल के मार्ग से लाई गई (वस्तुओं) का।
विद्यात्	:	समझे, जानें।
प्रियाप्रियताम्	:	शीघ्रबिक्री तथा मन्दबिक्री।
विक्षेपसंक्षेपक्रयविक्रययोगकालान्	:	विक्षेप (निस्तारण), संक्षेप (भण्डारण), क्रय एवं विक्रय के योग के समय को।
प्राप्तेऽर्घे	:	प्राप्ते अर्घे (मूल्ये), मूल्य के प्राप्त होने पर।
अर्घान्तरम्	:	मूल्य में तारतम्य।
स्वभूमिजानाम्	:	अपनी भूमि से (स्वदेश में) उत्पन्न वस्तु।
राजपण्यानाम्	:	राजकीय क्रय-विक्रय योग्य वस्तुओं का।
एकमुखम्	:	एक स्थान पर।
परभूमिजानाम्	:	दूसरे की भूमि (विदेश) से उत्पन्न वस्तु।
अनेकमुखम्	:	सभी स्थान पर।
अनुग्रहेण	:	बिना कष्ट के।
बहुमुखम्	:	बहुत स्थानों पर।
विक्रापयेत्	:	विक्रयं कारयेत्, विक्रय कराये।
वैदेहिकाः	:	व्यापारी।
पण्याधिष्ठातारः	:	राजकीय वस्तुओं का विक्रेता।
छेदानुरूपम्	:	छेदः, अर्घहानिः तस्याः अनुरूपम्, मूल्यों की हानि के अनुरूप।
काष्ठद्रोण्याम्	:	लकड़ी की पेटी में।

एकच्छिद्रापिधानायाम्	:	एक छेद वाली में अर्थात् एक द्वार वाली (पेटी) में।
निदध्युः	:	डाल दे।
वैधरणम्	:	जितनी मूल्य हानि हो उसकी मात्रा को 'वैधरण' कहते हैं।
अह्नः	:	दिन के।
अष्टमे भागे	:	आठवें भाग में (विक्रय काल की समाप्ति पर)।
तुलामानभाण्डकम्	:	तराजू के द्वारा मापक, बर्तन।
पण्यप्रतिपण्ययोः	:	स्वदेश एवं विदेश के क्रय, विक्रय की (वस्तुओं का)।
आगमय्य	:	विज्ञाय, जानकर।
शुल्कवर्तन्यातिवाहिक-गुल्मतरदेयभक्तभाटक-व्ययशुद्धम्	:	शुल्कादिव्ययशोधितावशेषम्। शुल्क, वर्तनी (मार्ग), आतिवाहिक (बैलगाड़ी), गुल्म (वनस्थानिक), तर (नदी को पार करना), तथा भक्त (भोजन), भाटक (मजदूरी) में किये गये व्यय के बाद का अवशेष।
उदयम्	:	लाभ।
असति उदये	:	लाभ न होने पर।
भाण्डनिर्वहणेन	:	बर्तन को ले जाने से।
सारम्	:	रत्नादि द्रव्य।
मोक्षयेत्	:	रक्षयेत्, रखना चाहिये।
भूमिमप्राप्तः	:	स्वपण्यविक्रयभूमिभूतात् स्वविषयम् अप्रत्यागतः, अपनी वस्तु के विक्रय के लिए भूमि की अप्राप्ति होने पर।
सर्वदेयविशुद्धम्	:	शुल्कादिदेयरहितम्, शुल्कादि के व्यय से रहित।

वारिपथे	:	जल के रास्ते में।
यानभाटकपथ्यदनपण्य-प्रतिपण्यार्घप्रमाणयात्रा-कालभयप्रतीकारपण्य-पत्तनचारित्राणि-	:	यानभाटक (नाविक मजदूरी), पथ्यदन (मार्ग भोजन) पण्यप्रतिपण्यार्घप्रमाण (वस्तु के बदले वस्तु के मूल्य का तारतम्य) भयप्रतीकार (तस्करादिभय का प्रतीकार) पण्यपत्तनचारित्राणि (अपनी वस्तु के विक्रयस्थान के पत्तन के चरित्र) को।
व्यवहारम्	:	वाणिज्यम्, व्यापार को।
चरित्रतः	:	तद्देशाचारानुरोधेन, सम्बन्धित देश के आचार के अनुरोध से।
यतः	:	येन पथा, जिस मार्ग से।

अभ्यासः

1. **संस्कृतभाषया उत्तराणि लिखत**

(क) अयं पाठः कस्माद् ग्रन्थात् सङ्कलितः कश्च अस्य प्रणेता?
(ख) केषाम् एकमुखं व्यवहारं स्थापयेत् केषाञ्च अनेकमुखम्?
(ग) वैधरणं केनानुरूपं दद्युः?
(घ) स्वविषये किं व्याख्यातम्?
(ङ) आत्मानं सारं कदा भोक्षयेत्?
(च) केन पथा गच्छेत् परिवर्जयेत् च?
(छ) वारिपथे कानि उपलभेत?
(ज) असति उदये केन लाभं पश्येत्?

2. **व्याख्येयः**

नदीपथे च विज्ञाय व्यवहारं चरित्रतः।
यतो लाभस्ततो गच्छेदलाभं परिवर्जयेत्।।

3. **रिक्तस्थानानां पूर्तिः क्रियताम्**

(क) बहुमुखं वा ________ वैदेहकाः ________ विक्रीणीरन्।

(ख) स्वभूमिजानां ________ एकमुखं ________ स्थापयेत्।

(ग) ________ अष्टमे भागे पण्याध्यक्षस्य ________ ।

(घ) असति उदये ________ पण्यप्रतिपण्यार्घेण वा ________ पश्येत्।

(ङ) परभूमिजानाम् ________ अनेकमुखं भवति।

4. **अधोलिखितानामाशयं स्पष्टीकुरुत**

(क) पण्याध्यक्षः स्थलजलजानां नानाविधानां पण्यानां प्रियाप्रियतां च विद्यात्।

(ख) उभयं च प्रजानाम् अनुग्रहेण विक्रापयेत्।

(ग) तुलामानभाण्डकं चार्पयेयुः।

(घ) आत्मनो वा भूमिमप्राप्तः सर्वदेयमशुद्धं व्यवहरेत्।

(ङ) छेदानुरूपं च वैधरणं दद्युः।

5. **पाठमधिकृत्य विक्रयसिद्धान्तस्य विवेचनं कुरुत।**

6. **अधोलिखितपदानाम् अर्थमेलनं क्रियताम्**

पण्यम्	एक स्थान पर
परभूमिजानाम्	व्यापारी
वैदेहकाः	तराजू के द्वारा मापक बर्तन
एकमुखम्	मूल्य हानि की मात्रा
तुलामानभाण्डकम्	क्रय-विक्रय योग्य वस्तु
वैधरणम्	विदेशों में उत्पन्न वस्तुओं का

नवमः पाठः

स्वास्थ्यरक्षणोपायाः

प्रस्तुत पाठ 'स्वास्थ्यरक्षणोपायाः' शीर्षकान्तर्गत आयुर्वेदशास्त्रपरम्परा के महान् विद्वान् श्री वाग्भट्टविरचित 'अष्टाङ्गहृदयम्' नामक ग्रन्थ के दिनचर्याध्याय से संकलित किया गया है। स्वास्थ्य संरक्षण के लिए जहाँ शरीर पोषण करने वाले भोजन की आवश्यकता है, वहीं उचित दिनचर्या के पालन करने की सर्वाधिक आवश्यकता है। उन उपायों में अभ्यङ्ग-स्नान, व्यायाम एवं विद्वानों की सेवा करना आदि स्वास्थ्य संवर्धन करने वाले कुछ उपायों का इस पाठ में वर्णन किया गया है।

अभ्यङ्गमाचरेन्नित्यं स जराश्रमवातहा।
दृष्टिप्रसादपुष्ट्यायुः स्वप्नसुत्वक्त्वदार्ढ्यकृत्।।1।।
शिरः श्रवणपादेषु तं विशेषेण शीलयेत्।
वर्ज्योऽभ्यङ्गः कफग्रस्तकृतसंशुद्ध्यजीर्णिभिः।।2।।
लाघवं कर्मसामर्थ्यं दीप्तोऽग्निर्मेदसः क्षयः।
विभक्तघनगात्रत्वं व्यायामादुपजायते।।3।।
उद्वर्तनं कफहरं मेदसः प्रविलायनम्।
स्थिरीकरणमङ्गानां त्वक्प्रसादकरं परम्।।4।।
दीपनं वृष्यमायुष्यं स्नानमूर्जाबलप्रदम्।
कण्डूमलश्रमस्वेदतन्द्रातृड्दाहपाप्मजित्।।5।।
उष्णाम्बुनाऽधः कायस्य परिषेको बलावहः।
तेनैव तूत्तमाङ्गस्य बलहृत्केशचक्षुषाम्।।6।।

देहवाक्चेतसां चेष्टाः प्राक् श्रमाद्विनिवर्तयेत्।
नोर्ध्वजानुश्चिरं तिष्ठेन्नक्तं सेवेत न द्रुमम्।।7।।
सर्वथेक्षेत नादित्यं न भारं शिरसा वहेत्।
नेक्षेत प्रततं सूक्ष्मं दीप्तामेध्याप्रियाणि च।।8।।
नित्यं हिताहारविहारसेवी, समीक्ष्यकारी विषयेष्वसक्तः।
दाता समः सत्यपरः क्षमावानाप्तोपसेवी च भवत्यरोगः।।9।।

शब्दार्थाः टिप्पण्यश्च

अभ्यङ्गम्	:	तेल मालिश।
वातहा	:	वातम् हरति इति वातहा। वायुदोष को दूर करने वाली।
सुत्वक्त्व	:	सुन्दर त्वचा युक्त।
दार्ढ्यकृत्	:	मजबूत करने वाला।
विभक्तघनगात्रत्वम्	:	शरीर के अंग-प्रत्यंग का सुडौल गठन।
उद्वर्तनं	:	उबटन।
मेदसः	:	चर्बी तथा मोटापे का।
वृष्यम्	:	पुष्टिकारी।
कण्डूः	:	खाज, खुजली।
तृड्दाहः	:	प्यास और जलन।
पाप्मजित्	:	शरीर की अशोभा, कान्तिहीनता।
परिषेकः	:	स्नान।
बलावहः	:	बल की वृद्धि करने वाला।
उत्तमाङ्गस्य	:	अङ्गेषु उत्तमभागः शिरः तस्य, सिर का।
बलहृत्	:	बलं हरति इति, बल हरने वाला।
चक्षुषाम्	:	नेत्रों का।
विनिवर्तयेत्	:	रोक देना चाहिए।
ऊर्ध्वजानुः	:	घुटनों को ऊपर करके।

ईक्षेत	:	देखें।
प्रततम्	:	अत्यन्त, सर्वदा।
दीप्तम्	:	प्रकाशयुक्त यथा अग्नि, विद्युत् आदि।
अमेध्यम्	:	अपवित्र, मलमूत्रादि।
समीक्ष्यकारी	:	सम्यक् विचार्य कार्यं करोति अर्थात् अच्छी प्रकार विचार करके कार्य करने वाला।
विषयेष्वसक्तः	:	कामादि विषयों में आसक्त न रहने वाला।
आप्तोपसेवी	:	आप्तान् यथार्थवक्तॄन् धर्मशीलान् सेवते यः अर्थात् तत्वज्ञानी एवं विश्वसनीय व्यक्तियों के साथ निरन्तर रहने वाला।
अरोगः	:	रोगाद् रहितः अर्थात् रोग से रहित।

अभ्यासः

1. संस्कृतेन उत्तरं देयम्

(क) 'अभ्यङ्गम्' अस्य अभिप्रायः कः ?
(ख) तैलमर्दनं विशेषेण कुत्र कर्त्तव्यम् ?
(ग) कीदृशः जनः अभ्यङ्गं नाचरेत् ?
(घ) व्यायामात् किं किं भवति ?
(ङ) उद्वर्तनेन के के लाभाः भवन्ति ?
(च) स्नानेन किं किं जायते ?
(छ) उष्णजलेन स्नानेन को लाभः ?
(ज) श्रमात् प्राक् किं विनिवर्तयेत् ?
(झ) शिरसा किं न वहेत् ?
(ञ) कीदृशः पुरुषः अरोगी भवति ?

2. रिक्तस्थानपूर्तिः करणीया

(क) विभक्तघनगात्रत्वं __________ उपजायते।

(ख) __________ कफहरं मेदसः प्रविलायनम्।

(ग) __________ तृड्दाहपाप्मजित्।

(घ) __________ उत्तमाङ्गस्य बलहृत् __________ चक्षुषाम्।

(ङ) दाता समः __________ भवत्यरोगः।

3. अधोलिखितानाम् आशयः स्पष्टीक्रियताम्

(क) दृष्टिप्रसादपुष्ट्यायुः स्वप्नसुत्वक्त्वदार्ढ्यकृत्।

(ख) वर्ज्योऽप्यङ्गः संशुद्ध्यजीर्णिभिः।

(ग) विभक्तघनगात्रत्वम्।

(घ) स्थिरीकरणमङ्गानाम्।

4. अधोलिखितकथनेषु यत् शुद्धं तत् (√) चिह्नेन तथा च अशुद्धं (X) चिह्नेन दर्शयत

(क) अभ्यङ्गेन मेदसः क्षयः न भवति।

(ख) उद्वर्तनेन तृड्दाहतन्द्रा दूरीभवति।

(ग) अप्रियाणि सदा ईक्षेत।

(घ) हिताहारविहारसेवी सदा अरोगी भवति।

5. 'क' भागस्थपदैः सह 'ख' भागस्थानाम् अर्थानाम् मेलनं क्रियताम्

'क'	'ख'
उत्तमाङ्गस्य	तृषा
नक्तम्	भास्करम्
अमेध्यम्	शिरसः
आदित्यम्	रात्रिः
तृट्	अपवित्रम्
त्वक्	आयुवर्धकम्
चक्षुषाम्	स्पर्शेन्द्रियम्
आयुष्यम्	दृशाम्

दशमः पाठः

खनिजगवेषणम्

विज्ञान के क्षेत्र में भूगर्भशास्त्र का विशिष्ट महत्त्व है क्योंकि पार्थिव जीवलोक का आधार 'भू' अर्थात् पृथ्वी है। भूगर्भ से अभिप्राय उन भौतिक पदार्थों से है जो पदार्थ इस पृथ्वी के बनाने के लिए, इसके परिवर्तन के लिए एवं इस पर स्थित स्थावर, जंगम वस्तुओं की स्थिति के लिए उत्तरदायी हैं। भूगर्भशास्त्र में मुख्य रूप से इसके अन्दर की ऊष्मा, जल एवं वायु के क्रियाकलाप तथा उनके द्वारा निर्मित स्वर्ण, रजत, ताम्र, लौह, कोयला तथा विविध गैसीय पदार्थों का अध्ययन किया जाता है। प्रस्तुत पाठ कौटिल्य अर्थशास्त्र के दूसरे अधिकरण के तीसवें प्रकरण के बारहवें अध्याय आकरकर्मात्तप्रवर्तनम् से लिया गया है। इसमें पृथ्वी की उग्र गन्धों, क्षारीय पदार्थों एवं प्रस्तर खण्ड़ों का अतिरोचक वर्णन किया गया है।

आकराध्यक्षः शुल्व-धातुशास्त्र-रस-पाक-मणि-रागज्ञः तज्ज्ञसंघो वा तज्ज्ञातकर्मकर-उपकरणसम्पन्नः किट्ट-मूष-अङ्गार-भस्मलिङ्गं वा आकरं भूतपूर्वम् अभूतपूर्वं वा भूमि-प्रस्तर-रस- धातुमत्यर्थं वर्ण-गौरवम् उग्रगन्धरसं परीक्षेत।

पर्वतानाम् अभिज्ञातोद्देशानां बिल-गुहा-उपत्यकालयन - निगूढखातेषु अन्तः प्रस्यन्दिनो जम्बू-आम्र-तालफल - पक्व-हरिद्राभेद-हरिताल- मनःशिला-क्षौद्रहिंगुलक- पुण्डरीक-शुक-

मयूर- पत्रवर्णाः सवर्णोदकौषधिपर्यन्ताः चिक्कणाः विशदा भारिकाश्च रसाः काञ्चनिकाः।

अप्सु निष्ठ्यूताः तैलवद् विसर्पिणः जलमलग्राहिणः च ताम्र-रूप्ययोः शतादुपरिवेद्धारः। तत्प्रतिरूपकम् उग्रगन्धरसं शिलाजतु विद्यात्।

सर्वधातूनां गौरववृद्धौ सत्त्ववृद्धिः। तेषामशुद्धा मूढगर्भा वा तीक्ष्णमूत्रक्षारभाविता राजवृक्ष-वट-पीलुगोपित्तरोचना महिष-खर-करभमूत्रपुरीष-पिण्डबद्धाः तत्प्रतीवापाः तदवलेपा वा विशुद्धाः स्रवन्ति। भारिकः स्निग्धो मृदुश्च प्रस्तरधातुः भूमिभागो वा पिंगलो हरितः पाटलः लोहितो वा ताम्रधातुः। काकमेचकः कपोतरोचनावर्णः श्वेतराजिनद्धो वा विस्रः सीसधातुः। ऊषरकर्बुरः पक्वलोष्ठवर्णो वा त्रपुधातुः। कुरुम्बः पाण्डुलोहितः सिन्दुवार-पुष्पवर्णो वा तीक्ष्णधातुः। काकाण्डवर्णः भूर्जपत्रवर्णो वा वैकृन्तक-धातुः। अच्छःस्निग्धः सप्रभो घोषवान् शीततीव्रः तनुरागश्च मणिधातुः। धातुसमुत्थितं तज्जातकर्मान्तेषु प्रयोजयेत्।

शब्दार्थाः टिप्पण्यश्च

आकराध्यक्षः	:	आकराणामध्यक्षः, आकर (खान—जिसमें से खनिज निकलते हैं) का अध्यक्ष।
शुल्वम्	:	शुल्व सम्बन्धी विद्या, प्राचीन काल में रस्सी (शुल्व) की सहायता से यज्ञवेदियों तथा अन्य स्थानों का नाप किया जाता था। आजकल इसे ज्यामिति (Geometry) कहा जाता है।

रसः	:	रसायनशास्त्र।
पाकः	:	पाकविधि, पकाने का प्रकार।
तज्ज्ञः	:	तेषां ज्ञाता, उन विद्याओं को जानने वाला।
कर्मकरः	:	कर्म करोति, काम को करने वाला।
उपकरणसम्पन्नः	:	उपकरणैः सम्पन्नः, कुल्हाड़ी, धौंकनी आदि यन्त्रों अथवा उपकरणों से युक्त।
किट्टमूषाङ्गारभस्मलिङ्गम्	:	किट्टञ्च मूषा च अङ्गारः, भस्म च लिङ्गम् यस्य तम् तथा भूतम्, कीटी (किसी पदार्थ-धातु आदि के बहुत छोटे-छोटे टुकड़े) मूषा (भूसी आदि), अङ्गार तथा भस्म (राख) आदि हैं पहचान जिनकी।
भूतपूर्वम्	:	पूर्वं भूतः, पुरानी (खान)।
भूमिः	:	मिट्टी।
प्रस्तरः	:	पत्थर।
रसः	:	पानी।
अत्यर्थवर्णगौरवम्	:	अत्यर्थम् अत्यधिकं वर्णस्य गौरवम्, अत्यधिक चमकदार रंग वाली।
धातुम्	:	धातु को।
उग्रगन्धम्	:	उग्रम् गन्धम्, तीखी गन्ध से युक्त।
अभिज्ञातोद्देशानाम्	:	पहले से ज्ञात या परिचित।
बिलम्	:	गड्ढा।
गुहा	:	गुफा।
उपत्यका	:	तराई।
निगूढखातेषु	:	गहरी खाइयों में।
अन्तःप्रस्यन्दिनो	:	(शिलाओं से ढके हुए) अन्दर ही अन्दर बहने वाले जल से।

जम्बूः	:	जामुन।
तालफलम्	:	ताड़ का फल।
पक्वहरिद्रा	:	पकी हुई (पक्की) हल्दी।
हरितालम्	:	हरताल।
क्षौद्रम्	:	शहद।
हिंगुलुकम्	:	विशेष राग द्रव्य।
मनःशिला	:	सलेटी रंग की विशेष शिला।
पुण्डरीकम्	:	कमल।
सवर्णोदका	:	समान रंग वाली।
चिक्कणा	:	चिकनी।
काञ्चनिका	:	सोने की खान।
विसर्पिणः	:	फैलता हुआ।
ताम्ररूप्ययोः	:	ताम्रञ्च रूप्यञ्च, तयोः, ताँबे और चाँदी की।
तत्प्रतिरूपकम्	:	उसी के समान।
शिलाजतु	:	शिलाजीत।
गौरववृद्धौ	:	भारीपन में वृद्धि।
मूढगर्भा	:	मैल जम जाने के कारण जिसके गुण दोषों का ज्ञान यथार्थ रूप से न हो सके।
तीक्ष्णमूत्राः	:	मनुष्य, हाथी, घोड़ा, गाय, गधा, बकरा आदि में से किसी का मूत्र।
क्षारभाविताः	:	तीक्ष्ण क्षार या खारीपन।
राजवृक्षः	:	अमलतास।
वटः	:	बरगद।
पीलुः	:	वृक्ष विशेष।
गोपित्तरोचना	:	गोपित्त तथा गोरोचन गेरु के प्रकार (भेद) हैं।
पुरीषपिण्डम्	:	पुरीष (मल का) पिण्ड।
अवलेपाः	:	लेप।

पाटलः	:	गुलाबी।
लोहितः	:	लाल।
काकमेचकः	:	कौए के समान काला।
कपोतरोचनावर्णः	:	कबूतर और गोरोचन की आकृति व वर्ण वाला।
श्वेतराजिनद्धः	:	सफेद रेखाओं से युक्त।
विस्रः	:	दुर्गन्धपूर्ण।
ऊषरकर्बुरः	:	ऊसर जमीन की भाँति कुछ सफेदी लिये हुये।
पक्वलोष्ठवर्णः	:	पके हुए ढेले के रंग का।
त्रपुधातुः	:	सफेद सीसा नामक धातु।
कुरुम्बः	:	चिकने पत्थरों वाला।
पाण्डुलोहितः	:	कुछ सफेद और लालिमा को लिए हुए।
सिन्दुवारपुष्पवर्णः	:	सिन्दुवार (निर्गुण्डी) पुष्प के रंग वाला।
तीक्ष्णधातुः	:	लोहा नामक धातु (लोहे का विशेष प्रकार)।
काकाण्डवर्णः	:	कौए के अण्डे के समान वर्ण वाला।
वैकृन्तकधातुः	:	इस्पाती लोहा नामक धातु।
अच्छः	:	स्वच्छ (इतना स्वच्छ कि उसमें परछाईं दिखायी दे)।
घोषवान्	:	शब्द देने वाला।
तनुरागः	:	फीके रंग वाला।
मणिधातुः	:	मणि नामक धातु।
धातुसमुत्थितम्	:	धातु (खान) आदि से प्राप्त लाभ को।
तज्जातकर्मान्तेषु	:	पुनः खान के ही कार्यों में लगाकर।

अभ्यासः

1. संस्कृतभाषया उत्तराणि लिखत
   (क) अस्मिन् पाठे कस्य पदार्थस्य वर्णनं कृतम् ?
   (ख) आकराध्यक्षः केषु शास्त्रेषु निष्णातो भवेत् ?
   (ग) धातुपरीक्षणे कानि लिङ्गानि ?
   (घ) काञ्चनिकायाः परीक्षणे केषां वृक्षानामावश्यकता भवति ?
   (ङ) सीसधातुः कथं भवति ?
   (च) धातूनां गौरववृद्ध्या कस्य वृद्धिर्भवति ?
   (छ) तीक्ष्णमूत्रस्य प्रयोगस्य का आवश्यकता ?

2. अधोलिखितधातूनां वर्णमेलनं क्रियताम्

धातुः	वर्णम्
ताम्रधातुः	तनुरागः
सीसधातुः	पक्वलोष्ठवर्णः
त्रपुधातुः	सिन्दुवारपुष्पवर्णः
तीक्ष्णधातुः	काकाण्डवर्णः
वैकृन्तकधातुः	हरितः पाटलः लोहितो वा
मणिधातुः	कपोतरोचनावर्णः

3. (क) धातुशोधनं कथं क्रियते ?
   (ख) खनिजगवेषणे गन्धप्रयोगः किं भवति ?

4. अस्य पाठस्य पृष्ठभूमौ कः ग्रन्थः अस्ति ?

5. स्पष्टीक्रियताम्
   शुल्वः, रसः, पाकः, उग्रगन्धम्, तीक्ष्णधातुः।

6. धातुसमुत्थितं कथं प्रयोजयेत् ?

7. निम्नाङ्कितानां धातूनां स्वरूपं लिखत
   त्रपुधातुः, वैकृन्तकधातुः, ताम्रधातुः।

एकादशः पाठः

ऋणवृद्धिप्रबन्धः

विनिवेश के द्वारा पूँजी का संवर्धन आर्थिक विकास का महत्त्वपूर्ण साधन है। इसके लिए द्रव्य की प्राप्ति विभिन्न स्रोतों से की जाती है। इसकी व्यवस्था राजकीय और निजी खजानों से ऋण रूप में होती है। ऋण का मूलधन किस्तों में चुकाने की एक निश्चित अवधि तय की जाती है और अवधि समाप्ति के पूर्व तक उस पर ब्याज देय होता हैं जो सम्पूर्ण व्यवसायों का स्रोत है। आज की व्यावसायिक और आर्थिक नीति के तहत इसकी दर मासिक और वार्षिक प्रतिशत के रूप में निश्चित होती है। संस्कृत के प्राचीन साहित्य में भी इसका उल्लेख मिलता है। आचार्य कौटिल्य ने अपने ग्रन्थ अर्थशास्त्र में इसका विस्तृत विवेचन किया है। वहाँ बताया गया हैं कि कुछ स्थितियों में ब्याज 15% तक लिया जाता था परन्तु अध्ययन के लिए (विद्यार्थियों को दिए गए ऋण के लिए) कोई ब्याज भुगतान नहीं करना पड़ता था और कुछेक खास परिस्थितियों में ऋण माफ भी कर दिया जाता था। प्रस्तुत पाठ कौटिलीय अर्थशास्त्र के तीसरे अधिकरण के 63वें प्रकरण के ग्यारहवें अध्याय के "ऋणादानम्" शीर्षक से उद्धृत है तथा तत्कालीन व्यावसायिक सिद्धान्तों में से ब्याज विषयक नीति का परिचायक है।

सपादपणा धर्म्या मासवृद्धिः पणशतस्य।
पञ्चपणा व्यावहारिकी।
दशपणा कान्तारगाणाम्।
विंशतिपणाः सामुद्राणाम्।

ततः परं कर्तुः कारयितुश्च साहसदण्डः।

श्रोतृणामेकैकं प्रत्यर्धदण्डः।

राजन्य योगक्षेमवहे तु धनिकधारणिकयोश्चरित्रमवेक्षेत।

धान्यवृद्धिः शस्यनिष्पत्तौ उपार्घा, परं मूल्यकृता वर्धेत।

प्रक्षेपवृद्धिरुदयार्धम्।

सन्निधानसन्ना वार्षिकी देया।

चिरप्रवासः संस्तम्भप्रविष्टो वा मूल्यद्विगुणं दद्यात्।

अकृत्वा वृद्धिं साधयतो वर्धयतो वा मूल्यं वा वृद्धिमारोप्य श्रावयतो बन्धचतुर्गुणो दण्डः।

तुच्छश्रावणायामभूतचतुर्गुणः।

तस्य त्रिभागमादाता दद्यात्।

शेषं प्रदाता।

दीर्घसत्रव्याधिगुरुकुलोपरुद्धं बालमसारं वा नर्णमनुवर्धेत।

मुच्यमानमृणमप्रतिगृह्णतो द्वादशपणो दण्डः।

कारणापदेशेन निवृत्तवृद्धिकमन्यत्र तिष्ठेत्।

दशवर्षोपेक्षितमृणमप्रतिग्राह्यमन्यत्र बाल-वृद्ध-व्याधितव्यसनि-प्रोषितदेशत्यागराज्यविभ्रमेभ्यः।

प्रेतस्य पुत्राः कुसीदं दद्युः।

अग्राह्याः कर्मकालेषु कर्षका राजपुरुषाश्च।

स्त्री वाऽप्रतिश्राविणी प्रतिकृतमृणमन्यत्र गोपालकार्धसीतिकेभ्यः।

पतिस्तु ग्राह्यः।

शब्दार्थाः टिप्पण्यश्च

सपादपणा : सवा पण (1¼)।

मासवृद्धिः : प्रतिमास ब्याज।

व्यावहारिकी	:	पण्यक्रयविक्रयव्यवहारप्रयोजना, पण्य के क्रय विक्रय के व्यवहार से युक्त।
सामुद्राणाम्	:	समुद्र के व्यापारियों का (पर)।
श्रोतृणाम्	:	गवाही देने वालों का।
धनिकः	:	ऋण देने वाला।
धारणिः	:	ऋण लेने वाला।
धान्यवृद्धिः	:	अन्न सम्बन्धी ब्याज।
सस्यनिष्पत्तौ	:	फसल के समय पर।
उपार्धा	:	चुकता करना हो।
मूल्यम्	:	मूलधन।
प्रक्षेपवृद्धिः	:	गोदाम के (इकट्ठे बेचे हुए माल) पर ब्याज।
सन्निधानसन्ना	:	लेन-देन सम्बन्धी हिसाब।
चिरप्रवासः	:	विदेश में निवास।
संस्तम्भप्रविष्टः	:	जानबूझकर (खरीददार) माल को न निकालता हुआ।
अकृत्वा	:	अवधि से पहले ही।
आदाता	:	ऋण लेने वाला।
प्रदाता	:	ऋण देने वाला।
दीर्घसत्रम्	:	*लम्बी अवधि तक यज्ञ कार्य में लगा हुआ।*
व्याधि	:	व्याधि (रोग) ग्रस्त।
गुरुकुलोपरुद्धम्	:	गुरुकुल में अध्ययन करने वाला।
असारम्	:	अशक्त व्यक्ति।
नर्णम्	:	न ऋणम्, ऋण नहीं (लेना चाहिए)।
मुच्यमानमृणम्	:	ऋण की अन्तिम (किस्त) रकम अदा करता हुआ।
कारणापदेशेन	:	कारण के बहाने से।
निवृत्तवृद्धिकम्	:	ब्याज के बिना ही।
प्रोषितः	:	प्रवासी।
प्रेतस्य	:	मरे हुए का।
कुसीदम्	:	ऋण।

कर्मकालेषु	:	काम पर लगे हुओं पर।
अग्राह्या	:	गिरफ्तार (बन्दी) नहीं करना चाहिए।
अप्रतिश्राविणी	:	(यदि ऋण चुकाना) स्वीकार न करती हो।
गोपालक	:	ग्वाला।

अभ्यासः

1. **संस्कृतभाषया उत्तराणि दीयन्ताम्**
   (क) पणशतस्य मासवृद्धिः कीदृशी भवति ?
   (ख) शस्यनिष्पत्तौ ऋणं कथं कारयेत् ?
   (ग) श्रावयतः कृते कः दण्डः ?
   (घ) कस्मात् ऋणं न गृह्णीयात् ?
   (ङ) व्यावहारिकाणां कृते का वृद्धिः ?
2. **स्पष्टीक्रियताम्**
   मासवृद्धिः, धान्यवृद्धिः, प्रक्षेपवृद्धिः, निवृत्तवृद्धिः।
3. **अस्य पाठस्य मूलस्रोतः किं वर्तते ?**
4. **अधोलिखितानां कृते ऋणवृद्धिप्रबन्धमेलनं क्रियताम्**

व्यावहारिकः	प्रत्यर्धदण्डः
सामुद्राणाम्	नर्णम्
श्रोतॄणाम्	पञ्चपणाः
गुरुकुलोपरुद्धम्	विंशतिः पणाः

5. **अन्तरं स्पष्टीकुरुत**

आदाता	–	प्रदाता
धनिकः	–	धारणिः
प्रोषितस्य	–	प्रेतस्य
मूल्यम्	–	वृद्धिः